"विलोलघण्टाक्वणितेन नागाः" रघुः "दुःसहा हि परिच्छिन्नः क्वणद्भिरलिगायकैः" अकाण्डकृतोत्साहाः" चक्वणाशङ्कितोयेऽद्य म्" "विभूषणानां क्वणितञ्च षट्पदः" भट्टिः "किञ्चित्क्वणत्किन्नरमध्युवास" क्रमा० उपनिप्रादिपूर्वः वीणायाः शब्दे अमरः। णिच् क्वणयति।

**क्वण** पु० क्वण—अप्। १वीणायाः शब्दे, अमरः २ध्वनिमात्रे हेमच०। कर्त्तरि अच्। ३शब्दकारके त्रि०

**क्वणन** न० क्वण—भावे ल्युट्। १वीणायाः शब्दे (कनकन) इति २शब्दभेदे। कर्त्तरि ल्यु। ३क्षुद्रघण्टिकायां (छोटघाण्डि) त्रिका०।

**क्वथ** निष्पचने (क्वाथशब्दोक्तपाकभेदे) भ्वा०पर०सक० सेट्। क्वथति एदित् अक्वथीत् चक्वाथ क्वाथः। क्वथ्यमानः। णिच् क्वाथयति "जलाशयेषु तप्तेषु क्वथ्यमानेषु वह्निना" भा० आ० २२६अ० "पञ्चान्नयोर्वाप्यश्नीयात् यवागूं क्वथितां सकृत्" मनुः

**क्वथित** त्रि० क्वथ—क्त। १अतिशयपक्वे व्यञ्जनादौ, २दशमूलपाचनादौ च हेमच०। भावप्र० क्वथितजलगुणा उक्ता यथा "क्वथितस्य जलस्य शीतलीकृतस्य विशेषमाह सुश्रुतः। "शृताम्बु तत् त्रिदोषघ्नं यदन्तर्वाष्पशीतलम्। अरूक्षमनभिष्यन्दि कृमिहृट्ज्वरहृल्लघु। धारापातेन विष्टम्भि दुर्ज्जरं पवनाहृतम्। भिनत्ति श्लेष्मसंघातं मारुतञ्चापकर्षति। अजीर्णं जरयत्याशु पीतमुष्णोदकं निशि:" अन्तर्वाष्पशीतलम् पिहितमेव शीतलम्"

**क्वथिता** स्त्री भावप्र० उक्ते(कड़ी)इतिख्याते पदार्थे "स्थाल्यां घृते वा तैले वा हरिद्राहिङ्गु भर्जयेत्। अवलेहनसंयुक्तं तक्रन्तत्रैव निःक्षिपेत्। एषा सिद्धा समरीचा क्वथिता क्वथिता बुधैः। अवलेहनम्। (आरहन) इति लोके। "क्वथिता पाचनी रुच्या लघ्वी वह्निप्रदीपनी। कफानिलविबन्धघ्नी किञ्चित्पित्तप्रकोपणी। अलीकमत्स्याः शुष्का वा किं वा क्वथितया पुनः। बृंहणा रोचना वृष्या बल्या वातगदापहा। कोष्ठशुद्धिकरी शुक्रा किञ्चित्पित्तप्रकोपनी। अर्द्दिते सहनुस्तम्भे विशेषेण हिता स्मृता"।

**क्वल** पु० कु+अल—अच्। प्रौढवदरफले "कुवलं यत् पूतीकैर्वा पर्णवल्कैर्वातञ्च्यात् सौम्यं तद्यत् कुलैराक्षसं तत् तद्यत् तण्डुलैर्वैश्वदेवं तद्यदातञ्चनेन मानुषं तद्दध्ना यत् इन्द्रं दध्नातनक्ति सेन्द्रत्वाय" इति तैत्ति० २।५।३।५ "सोमवल्लीसमानाया लतायाः खण्डाः पूतीकाः। पलाशकाष्ठस्थांशाः पर्णवल्काः। प्रौढवदरफलानि कुलाः। ईषदम्लतक्रम तञ्चनं पूतीकादिभिरातञ्चनं सोमप्रियम्" भा०।

**क्वाण** पु० क्वण भावे घञ्। १शब्दे उपनिप्रादिपूर्व्वकस्तु वीणायाःशब्दे अमरः। ज्वला० कर्त्तरि ण। २शब्दकर्त्तरि त्रि०

**क्वाथ** पु० क्वथ-करणे घञ्। १अतिदुःखे हेम०। दुःखेन हि चित्तं क्वथ्यमानमिव भवतीति तस्य तथात्वम्, वैद्यकोक्ते जलादेः पाकभेदे यथा भावप्रकाशे

"पानीयं षोड़शगुणं क्षुण्णे द्रव्यपले क्षिपेत्। मृत्पात्रे क्वाथयेद् ग्राह्यमष्टमांशावशेषितम्। कर्षादौ तु पलं यावद्दद्यात् षोड़शिकं जलम्। ततस्तु कुड़वं यावत्तोयमष्टगुणं भवेत्। चतुर्गुणमतस्त्वोर्द्ध्वं यावत्प्रस्थादिकं जलम्। षोडशिकं षोड़शगुणम्। "तज्जलं पाययेद्धीमान् कोष्णं मृद्वग्निसाधितम्। शृतः क्वाथः कषायश्च निर्यूहः स निगद्यते"। क्वाथपानमात्रामाह "मात्रोत्तमा पले तत् स्यात् त्रिभिरक्षैस्तु मध्यमा। जघन्या च पलार्द्धेन स्नेहक्वाथौषधेषु च। तन्त्रान्तरे "क्वाथ्यद्रव्यपले वारि द्विरष्टगुणमिष्यते। चतुर्भागावशिष्टन्तु पेयं पलचतुष्टयम्। दीप्तानलं महाकायं पाययेदञ्जलिं जलम्। अन्ये त्वङ्गं परित्यज्य प्रकृतिं तु चिकित्सकाः। क्वाथत्यागमनिष्क्रान्तस्त्वष्टभागावशेषितम्। पारम्पर्योपदेशेन वृद्धवैद्याः पलद्वयम्"। अष्टभागावशेषितस्य चतुर्भागावशिष्टापेक्षया गुरुत्वात् दीप्तानलं महाकायं पलद्वयं पाययेन्मध्यमाग्निमल्पकायं पलमात्रं पाययेत् मात्रोत्तमा पलेनस्यादित्यादि वचनात्। "क्वाथे क्षिपेत् सितामंशैश्चतुर्थाष्टमषोड़शैः। वातपित्तकफातङ्के विपरीतं मधु स्मृतम्। जीरकं गुग्गुलुं क्षारं लवणं च शिलाजतु। हिङ्गु त्रिकटुकं चैव क्वाथे शाणोन्मितं क्षिपेत्। क्षीरं घृतं गुडं तैलं मूत्रं चान्यत् द्रवं तथा। कल्कं चूर्णादिकं क्वाथे निःक्षिपेत् कर्षसंमितम्। तत्रोपविश्य विश्रान्तः प्रसन्नवदनेक्षणः। औषधं हेमरजतमृद्भाजनपरिस्थितम्। पिवेत् प्रसन्नहृदयः पीत्वा पात्रमधोमुखम्। विधायाचम्य सलिलं ताम्बूलाद्युपयोजयेत्"।

क्वाथसेवनप्रकारादि भावप्र० दर्शितं यथा

"तत्रानुक्ते प्रभातं स्यात्कषायेषु विशेषतः। मुख्यभैषज्यसम्बन्धो निषिद्धस्तरुणज्वरे। तोयपेयादिसंस्कारे त्वदोषं तत्र भेषजम्"। मुख्यभेषजं क्वाथः तस्य सम्बन्धः पानम्। यतआह "न कषायं प्रशंसन्ति नराणां तरुणे ज्वरे।